श्री आत्मानन्द-ग्रन्थमाला षट्त्रिंशत्तमं रत्नम् ( ३६ )

श्री कनककुशलगणिसंकलिता

# ॥ श्री रोहिणी-अशोकचंद्रकथा ॥

श्रेष्ठिदीपचंद्रगांडाभ्रातुस्सुपत्नी "मोतीबाइ" इत्यभिधानायाद्रव्यसाहाय्येन.

प्रकाशयित्री भावनगरस्था-श्री जैन आत्मानन्द सभा.

इदं पुस्तकं वल्लभदास त्रीभुवनदास गांधी सेक्रेटरी इत्यनेन प्रकाशितम्.

वीर संवत् २४४१ आत्म संवत् १९ विक्रम संवत् १९७१

'आनंद' मुद्रालयाधिपतिना शाहलल्लुभ्रात्रात्मजेन गुलाबचंद्रेण मुद्रितम्.

॥ अर्हम् ॥

॥ श्रीमद्विजयानन्दसूरीश्वरेभ्यो नमः ॥

# ॥ श्री रोहिणी–अशोकचन्द्रकथा. ॥

(श्री कनककुशलविरचिता.)

श्रीमान् पार्श्वजिनः सर्वा,–भीष्टसिद्धिविधायकः । भव्यानां भूतये भूया,–त्तमालश्यामलद्युतिः ॥ १ ॥ कवीनां जननी नित्यं, पुस्तकन्यस्तहस्तका । मरालवाहना देवी, शारदा वरदास्तु मे ॥ २ ॥ नत्वा विद्यागुरुं प्राणि,–प्रतिबोधैकहेतवे । तपसि श्लाघिते सद्भिः, प्रोच्यते रोहिणीकथा ॥ ३ ॥ शक्यते तत्तपः कर्तुं, केनचिद्धीरचेतसा । बंभज्यते यदस्थीनि, मदमत्तोरुदंतिनः ॥ ४ ॥ यस्माद्भवंति विविधा, लब्धयश्चारुसिद्धयः । क्षयश्चाशेषपापानां, कः स्तवीति न तत्तपः ॥ ५ ॥ रूपं सौभाग्यसंयुक्तं, शरीरं व्याधिवर्जितं । सर्वत्र विस्तृता कीर्ति–स्त्रिजगज्जनमान्यता ॥ ६ ॥ ललना कमनीया च, सुताः सविनया धनं । इहेति निःशेषजनै–र्गीयते तपसः फलं ॥ ७ ॥ युग्मं ॥ यतः—यद् दुरं यद् दुराराध्यं, यच्च दूरे व्यवस्थितं । तत्सर्वं तपसा साध्यं, तपो हि दुरतिक्रमं ॥ ८ ॥ प्रवर्त्तते यस्तपसि, शोकस्तस्य कदापि न । रोहिण्या इव विश्वेऽस्मि–स्तत्कथाथ प्रतन्यते ॥ ९ ॥ जंबू-

द्वीपस्य भरत-क्षेत्रे शस्यर्धिबंधुरे । अंगदेशोऽस्ति विख्यातो, देशानामादिमः क्षितौ ॥ १० ॥ ईतिभीतिविनिर्मुक्ता, सन्नीति-क्षिहितोदया । तत्रासीद्विगताकंपा, चंपाख्या प्रवरा पुरी ॥ ११ ॥ श्रीवासुपूज्यतीर्थेश-तनयस्तत्र नीतिवित् । मघवाख्योऽभव-द्राजा, प्रजापालनतत्परः ॥ १२ ॥ सदा सदाचारपरा, जनमान्या पतिव्रता । तस्याभवत् प्रिया नाम्ना, लक्ष्मीर्लक्ष्मीरिवांगिनी ॥ १३ ॥ तयोः सुतानामष्टाना-मुपर्येकाभवत्सुता । नाम्ना हि रोहिणी ख्याता, पित्रोरत्यंतवल्लभा ॥ १४ ॥ चतुःषष्टिकलापात्रं, रतिरूपा प्रियंवदा । नयमार्गरता चारु-लावण्यरसनिम्नगा ॥ १५ ॥ सारंगशावनयना, नयनानंददायिनी । स्त्रीजनेषु शिरोरत्नं, विज्ञानधनसेवधिः ॥ १६ ॥ स्त्रीजातित्वेन विहित-पक्षपाता गिरा किमु । चंचत्कांचनगौरांगी, तनुमध्या पिकस्वरा ॥ १७ ॥ सर्व-स्यापि कुटुंबस्य, मान्याह्लादकरी च सा । स्तोकं हि वस्तु मिष्टं स्यादिति लोकोऽपि भाषते ॥ १८ ॥ चतुर्भिः कलापकं ॥ शोभनं यौवनं प्राप्तां, तां सुतां वीक्ष्य भूमिपः । मघवाख्यश्चकारोच्चै-स्तत्स्वयंवरमंडपं ॥ १९ ॥ प्रेषयित्वा ततो दूता-नाहूतास्तेन भूरिशः। राजानो राजपुत्राश्च, रूपनिर्जितमन्मथाः ॥ २० ॥ अंगवंगकलिंगांध्रजालंधरमरुस्थलाः । लाटभोटमहाभोट, मेदपाटविराटकाः ॥ २१ ॥ गौडचौडमहाराष्ट्र, सौराष्ट्रकुरुगुर्जराः । आभीरकीरकाश्मीर, गोलपंचालमालवाः ॥ २२ ॥ हूणचीणमहाचीण, क-च्छकर्णाटकुंकणाः । सपादलक्षनेपाल-कन्यकुब्जककुंतलाः ॥ २३ ॥ मगधानिषधासिंधु, विदर्भद्रविडोंद्रकाः । इत्याद्यनेकदेशेभ्य-स्तत्राजग्मुर्नृपोत्तमाः ॥ २४ ॥ ते सर्वे सुंदराकाराः, शृंगाररसभाजनं । मंचानुच्चानलंचक्रु-र्विमानानीव नाकिनः ॥ २५ ॥ शुभेऽह्नि श्वेतवसना, स्नाता कृतविलेपना । महार्घभूषणधरा, कज्जलांकितलोचना ॥ २६ ॥ समग्रयूनां चित्तानि, सहसा पश्यतोहरा । अतिप्राज्ञसखीवर्गा-नुगता विकसन्मुखी ॥ २७ ॥ नृवाह्यवाहनारुढा, सुरीव धरणीगता । समागाद्रोहिणी कन्या

तं स्वयंवरमंडपं ॥ २८ ॥ त्रिभिर्विशेषकं ॥ भूपानां नामगोत्रेषु, विज्ञा विज्ञातमानसा । पुरोभूय जगादोच्चैर्वेत्रिणी रोहिणींप्रति
॥ २९ ॥ सिद्धप्रशस्यशस्यानां, मालवानामसौ प्रभुः । विवेकनयनैपुण्यपूर्णोऽयं गुर्जराधिपः ॥ ३० ॥ कदल्यादिफलास्वाद-
विज्ञः कुंकणराडयं । शत्रुंजयाद्रिविभ्राजि-सौराष्ट्रनृपतिस्त्वयं ॥ ३१ ॥ अयं हि चित्रकूटाद्रि-विलसन्मेदपाटराट् । सद्रत्नकं-
बलोल्लासि-नेपालानामसौ पतिः ॥ ३२ ॥ प्रौढकोटिशिलाशालिमगधानामसौ विभुः । अयमर्बुदतीर्थोघ-न्मरुस्थलमहीपतिः
॥ ३३ ॥ असौ तु शारदापाद--न्यासकाश्मीरदेशराट् । अयं हि मत्तमातंगकलिंगविषयाधिपः ॥ ३४ ॥ असौ चारुगुणश्रेणी-
वीतशोकनृपात्मजः । नाम्ना ह्यशोकचंद्राख्यो, भूपतिर्भूरिभूतिभृत् ॥ ३५ ॥ सपादलक्षदेशेशः, श्रीमन्नागपुरस्थितिः । युवा
न्यायरतो धीमान्, विख्यातो भूतलेऽखिले ॥ ३६ ॥ युग्मं ॥ इत्याद्यखिलभूपेषु, यस्ते चेतसि रोचते । वरस्तमेव भो भद्रे, वृणु
वीक्ष्य विशेषतः ॥ ३७ ॥ इति तद्वचनं श्रुत्वा, रोहिण्युत्फुल्ललोचना । प्रत्येकं भूपतीनुच्चै-र्वीक्षतेस्म दृशा स्वयं ॥ ३८ ॥ अ-
न्यानशेषभूपालान्, मुक्त्वा सा वरमालिकां । अशोकचंद्रभूपस्य, कंठे चिक्षेप दक्षहृत् ॥ ३९ ॥ कन्यापित्रा ततो भक्त्या,
सत्कृता वसनादिभिः । विसृष्टाश्च नृपाः सर्वे, जग्मुः स्वान् विषयान् प्रति ॥ ४० ॥ मघवाख्यो महीभर्ता, शुभलग्नेऽथ सोत्सवं ।
अशोकचंद्ररोहिण्यो-र्विवाहं विधिना व्यधात् ॥ ४१ ॥ आश्वीयं हास्तिकं चारु-भूषणानि मणीनपि । जामातुः श्वशुरः प्रादा-
त्करमोचनपर्वणि ॥ ४२ ॥ अथाशोकनृपस्तत्र, परिणीय नृपांगजां । तस्थिवान् कतिचिद्घस्रान्, समोदं श्वशुराग्रहात् ॥ ४३ ॥
अन्येद्युर्जननी पुत्रीं, विनयावनतामवक् । प्रोच्यमानां मया भद्रे, हितशिक्षां शुभां शृणु ॥ ४४ ॥ पत्यौ प्रीतिमती रक्ता, भक्ता
देवेषु साधुषु । विरक्ता दर्शनेऽन्येषां, नृणां भूयाश्च रागतः ॥ ४५ ॥ पत्यादिभिः शिक्षिता त्वं, मा कार्षीः कर्हिचित्क्रुधं । दुःखे

सत्यपि दीनत्वं, विषादं च विशेषतः ॥४६॥ गुणेष्वेवादरः कार्यः, कलानां शिक्षणे तथा । अर्हत्प्रणीतधर्मे च, विद्यायां विनये नये ॥४७॥ क्षमावती सुतवती, भूयाः सतीमतल्लिका । शास्त्रोदितं वधूकृत्यं, कुर्याः सकलमादरात् ॥४८॥ तथाहि—शय्योत्पाटन-गेहमार्जनपयःपावित्र्यचुल्लीक्रिया—स्थालीक्षालनधान्यपेषणभिदो गोदोहतन्मंथने । पाकस्तत्परिवेषणं समुचितं पात्रादिशौच-क्रिया, श्वश्रूभर्तृननांददेवृविनयाः कृत्यानि वध्वा इति ॥ ४९ ॥ जनन्याभिहितां शिक्षां, प्रतिपेदे तथेति सा । हितैषिणा हि गुरुणा, शिष्यो विनयवानिव ॥ ५० ॥ अथ श्वशुरमापृच्छ्य, समादाय प्रियां निजां । अशोकचंद्रो नृपतिः, स्वपुरं सैन्ययुग्ययौ ॥ ५१ ॥ सहस्रनेत्रः शच्येव, रत्येव रतिवल्लभः । सार्धं दयितया भूपो, विललास यथासुखं ॥ ५२ ॥ क्रमाच्चतुष्कं पुत्रीणामष्टौ च प्रवराः सुताः । संजज्ञिरे हि रोहिण्याः, सुरूपाः शुभलक्षणाः ॥ ५३ ॥ सप्तभूमिकसत्सौध—गवाक्षस्थेन भूभृता । लोकपालाभिधः पुत्रो—ऽन्यदोत्संगे निवेशितः ॥ ५४ ॥ तस्मिन्नवसरे काचि—दत्यासन्नगृहस्थिता । मृतस्वपुत्रदुःखेन, रुरोद भृशमंगना ॥ ५५ ॥ महीभर्तुः समीपस्था, राज्ञी श्रीरोहिणी तदा । तां स्त्रियं रुदतीं वीक्ष्य, प्रोचे प्राणप्रियं निजं ॥ ५६ ॥ कं हि रागं करोत्येषा, षट्सु रागेषु धीमती । चित्रकृन्नाटकं किं वा, विचित्राभिनयान्वितं ॥ ५७ ॥ स्मित्वा मनाग्महीपालः, स्वप्रियामवदद्भुजे । इदं हि रोदनं लोके, को न जानाति देहभृत् ॥५८॥ रोदनं हसनं कामक्रीडा भक्षणमीक्षणं । गमनं शयनं निद्रा स्वयं सिद्धान्यमूनि हि ॥५९॥ अपुण्ययोगाज्जंतूनां, जायंते धनहानयः । अनिष्टयोगा इष्टानां, वियोगाश्चाधयो रुजः ॥ ६० ॥ ततः स्याद् दुःसहं दुःखं, स्याच्चतो रोदनोद्गमः । संभवेच्चत्क्षणादेव, स तु स्त्रीणां विशेषतः ॥ ६१ ॥ युग्मं ॥ त्वं तु गर्ववशादेवं, ब्रवीषि सुखिनी सती, न दुःष्पत्युदरं पार्श्वे, यस्य तस्यैति च स्मितं ॥ ६२ ॥ इति भर्तुर्वचः श्रुत्वा, जगाद किल

रोहिणी। इदं हि रोदनं नाथ, मम नायाति सर्वथा ॥ ६३ ॥ नास्ति मे मानसे गर्वो राज्यैश्वर्यसुखोद्भवः । न चापि हास्यवचन-मनर्हं वदनांबुजे ॥ ६४ ॥ ततो वसुमतीपालो, बभाण निजवल्लभां । वामोरु सांप्रतं पश्य, रोदनं शिक्षयामि ते ॥ ६५ ॥ इत्युक्त्वा लोकपालाख्य-मुत्संगात्स्वीयमंगजं । कराभ्यां सहसोत्पाट्याधस्ताच्चिक्षेप भूपतिः ॥ ६६ ॥ तदा हाहारवश्चक्रे, राज्ञः पार्श्वस्थितैर्नरैः । भवेद् दुःखं न केषां हि, महतां विपदागमे ॥ ६७ ॥ चलन्करादयं सूनुः , पतितो हेति भूधवः । जगौ तथापि रोहिण्या, नाभूद् दुःखं न रोदनं ॥ ६८ ॥ तावत्पतंतं तं बालं गृहीत्वा पुरदेवता । सिंहासने मुमोचाधः—स्थिते स्वयं विनिर्मिते ॥ ६९ ॥ राज्ञादिष्टा नरास्तस्मात्, स्थानादुत्तीर्य सत्वरं । ददृशुर्विलसंतं तं, हसंतं शिशुमुच्चकैः ॥७०॥ निवृत्य हर्षितास्तेऽथ, संयोजितकरद्वयाः । राज्ञो विज्ञपयामासु-र्नंदनक्षेममुत्सुकाः ॥ ७१ ॥ तत्स्वरूपं शिशोर्वीक्ष्य, विस्मिताः सर्वचेतसि । अहो पुण्यमहो पुण्य,—मिति सर्वे जगुर्जनाः ॥ ७२ ॥ यतः—पुण्यैः संभाव्यते पुंसा—मसंभाव्यमपि क्षितौ । तेरुर्मेरुसमाः शैलाः किं न रामस्य वारिधौ ॥ ७३ ॥ वने रणे शत्रुजलाग्निमध्ये, महार्णवे पर्वतमस्तके वा । सुप्तं प्रमत्तं विषमस्थितं वा, रक्षंति पुण्यानि पुराकृतानि ॥ ७४ ॥ धन्येयं रोहिणी रामा या न जानाति रोदितुं । सर्वत्र प्रपथे तस्या, इति श्लाघा जने हिता ॥७५॥ अन्यदा श्रीवासुपूज्य,—जिनशिष्यौ महामुनी । रूप्यकुंभस्वर्णकुंभ,—नामानावागताविह ॥ ७६ ॥ तयोरागमनं श्रुत्वा, गत्वा च सपरिच्छदः । नत्वा तौ मेदिनीपालो, निषसाद यथाविधि ॥ ७७ ॥ चतुर्ज्ञानधरो धीरो, रूप्यकुंभाभिधो मुनिः । प्रददौ देशनां सम्यग्, जनानां हितकाम्यया॥ ७८ ॥ तद्यथा— अस्थिरेण शरीरेण, स्थिरं धर्मं समाचरेत् । प्रायेण खलु यास्यंति, प्राणाः प्राघूर्णका इव ॥ ७९ ॥ धर्मो दुष्कर्मघर्मौघ,—तापनिर्वापणौषधं । साध्यते वपुषानेन, कूपकेनेव शर्करा ॥ ८० ॥ नमस्कारं हारं

रोहि- ॥ १ ॥

वहत हृदये कर्णयुगले, श्रुतं ताटंकाभं करकुवलयोर्दानवलयं । गुरोराज्ञां शीर्षे मुकुटमतुलं येन भविकाः, स्वयं युष्मत्कंठे क्षिपति वरमालां शिववधूः ॥ ८१ इत्यादिदेशनाप्रांते, गुरुं पप्रच्छ भूपतिः । दुःखं न वेत्ति भगवन्, रोहिणी रोदनादिकं ॥ ८२ ॥ अनया किं कृतं सम्यक्, पुण्यं प्राचीनजन्मनि । कथ्यतां विस्मयकरं, विधाय करुणां मयि ॥ ८३ ॥ गुरुरूचेऽत्रैव पुरे, धनमित्रोऽभवद्धनी । तस्यासीत्सुंदरी भार्या ॥ वासवस्य शची यथा ॥ ८४ ॥ तयोर्बभूव तनया, कुरूपाधिकदुर्भगा । दुर्गंधा कज्जलश्यामा, नाम्ना कालीति विश्रुता ॥ ८५ ॥ सा यौवनवती पित्रा, दत्ता रंकस्य कस्यचित् । धनकोट्या समं सोऽपि, परं नेच्छति तां खलु ॥ ८६ ॥ अन्यदा धनमित्रः स, चौरं श्रीषेणनामकं । मार्यमाणं मोचयित्वा, नीत्वौकसि तमब्रवीत् ॥ ८७ ॥ भो भद्र मद्गृहे तिष्ठ, दत्तेयं ते मया सुता । सुखं भुंक्ष्व गृहाणाशु, वस्त्राण्याभरणानि च ॥ ८८ ॥ तथेति प्रतिपद्यासौ, स्थितः श्रेष्ठीशवेश्मनि । भोजितश्चारुपक्वान्नैः, श्वश्र्वा विविधभंगिभिः ॥ ८९ ॥ अथ सुष्वाप पर्यंके, निशायां स तया सह । क्षणात्तद्देहदुर्गंधा,-न्नंष्ट्वा स प्रययौ क्वचित् ॥ ९० ॥ तं नष्टं तत्पिता ज्ञात्वा,-भ्यधादेवं निजां सुतां । दीनादिभ्यः सदा दानं, देहि सर्वसुखप्रदं ॥ ९१ ॥ साज्ञां पितुः प्रपद्याभू,-द्दानं दातुमथोद्यता । दुर्गंधायाः करात्तस्याः कोऽप्यन्नं नो ललौ परं ॥ ९२ ॥ ततोऽतिदुःखिनी दीना, तस्थौ सा रुदती भृशं । अभुक्तं सत्कथं कर्म, क्षयं याति हि देहिनां ॥ ९३ ॥ यतः—

नाभुक्तं क्षीयते कर्म, कल्पकोटिशतैरपि । अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाशुभं ॥ ९४ ॥ अन्यदा तत्पुरोद्याने, गुरुर्ज्ञानी समागमत् । धनमित्राभिधः श्रेष्ठी, तद्वंदनकृते ययौ ॥ ९५ ॥ गुरुं प्रणम्य विधिना, श्रुत्वा धर्मस्य देशनां । पुत्र्याः पूर्वभवं श्रेष्ठी, पप्रच्छ रचितांजलिः ॥ ९६ ॥ उवाच गुरुरप्येव,-मत्रैव भरतेऽभवत् । पुरं गिरिपुरं नाम, श्रिया स्वःपुरसन्निभं

कथा. ॥ १ ॥

॥ ९७ ॥ तत्रासीन्न्यायनिरतः, पृथ्वीपालाभिधो नृपः । तस्य सिद्धिमती राज्ञी, बभूवात्यंतवल्लभा ॥ ९८ ॥ ययावन्येद्युरुद्याने क्रीमितुं सप्रियो नृपः । तदा चैकस्तु भिक्षायै, मुनिमायातमुत्तमं ॥ ९९ ॥ ध्यायतिस्मेति नृपतिः, साधुरेष गुणाकरः । महातीर्थं पुण्यपात्रं, कर्मक्षयसमुद्यतः ॥ १०० ॥ यतः— साधूनां दर्शनं पुण्यं, तीर्थभूता हि साधवः । तीर्थं फलति कालेन, सद्यः साधुसमागमः ॥ १ ॥ तदस्मै साधुवर्याय, निःस्पृहाय वपुष्यपि । शुध्धान्नपानयोर्दानं, फलाय महते भवेत् ॥ २॥ यतः—" दानमौचित्यविज्ञानं, सत्पात्राणां परिग्रहः । सुकृतं सप्रभुत्वं च, पंच प्रतिभुवः श्रियः ॥ ३ ॥ ध्यात्वेति भूपतिः स्माह, स्वप्रियां प्रेमसंभृतां । अस्मै वलित्वा मुनये,दानं देहि वरानने ॥ ४ ॥ प्रपद्य तद्वचः पत्यु,—रेषा बहिःप्रमोदभाक् । क्रीमांतरायाद्दुष्टांत,—र्वचले स्वगृहंप्रति ॥५॥ गत्वा सा स्वगृहं तस्मै, साधवे कटुतुंबकं । प्रद्वेषपूरिता प्रादात्, प्रद्विष्टाः किं न कुर्वते ॥ ६ ॥ मुनिः कृत्वा तमाहारं, स्वांत्यावस्थां विभाव्य च । विधायाऽनशनं सम्यग्, जगाम त्रिदशालयं ॥ ७ ॥ विज्ञाय तन्महीपालः, सर्वं व्यतिकरं क्रुधा । द्रुतं निष्कासयामास, तां राज्ञीं निजदेशतः ॥ ८ ॥ साभवत्सप्तमे घस्रे, वराकी कुष्ठिनी ततः । अत्युग्राणां हि पापाना,—मिहैव फलमाप्यते ॥ ९ ॥ यतः—चेइअदव्वविणासे, इसिघाए पवयणस्स उड्डाहे । संजइचउत्थभंगे, मूलग्गी बोहिलाभस्स ॥१०॥ चिरं जनैर्निंद्यमाना, ताड्यमाना पदे पदे । सा मृत्वा नरकं षष्ठं, जगामात्मसमार्जितं ॥११॥ ततस्तिरश्चां सा योना,—वुत्पन्ना पूर्वकर्मतः । ततश्च दुःखप्रचुरे, सप्तमे नरके खलु ॥ १२ ॥ एवं हि प्रययौ पापा, सर्वेषु नरकेषु सा । नराणां पाप्मनां न स्या,—न्नरकादपरा गतिः ॥ १३ ॥ ततः सा सर्पिणी चोष्ट्री, शृगाली कुर्कुटी तथा । शूकरी गृहगोधा च, जलौका मूषिका पुनः ॥ १४ ॥ काकी शुनी बिमाली च, रासभी गौरजा तथा । प्रायोऽग्निशस्त्रघाताद्यै,—र्मृतिरेषु भवेष्वभूत् ॥ १५ ॥ युग्मं ॥

धेनुस्तु स्वांत्यसमये, नमस्कारं गुरूदितं । श्रुत्वानुमोदयामास, मृतिमाप च तत्क्षणात् ॥ १६ ॥ नमस्कारप्रभावेण, साभव-
स्तव नंदिनी । कर्मणा तेन दुर्गंधा, दुर्भगा च महामते ॥ १७ ॥ इति पूर्वभवोदंत,-माकर्ण्य गुरुणोदितं । शुभध्यानवशात्काली,
लेभे जातिस्मृतिं क्षणात् ॥ १८ ॥ दृष्ट्वा पूर्वभवानेषा, भीता मुनिमवोचत । एतस्माद्दुष्कृताद् द्रागमां, निस्तारय दयापर ॥ १९ ॥
गुरुः प्रोवाच भो भद्रे, कुरु त्वं रोहिणीतपः । सप्तवर्षाणि सप्तैव, मासान् यावच्छुभाशया ॥ २० ॥ रोहिणीनामनक्षत्र,-दिने
हि क्रियतां त्वया । उपवासश्चार्हतोऽर्चा, वासुपूज्यस्य भक्तितः ॥ २१ ॥ एतत्तपःप्रभावात्त्व,-मशोकचंद्रभूपतेः । भूत्वा राज्ञी
तपस्तप्त्वा, व्रजिष्यासि शिवं शुभे ॥ २२ ॥ तदा हि वासुपूज्यस्या,-र्हतस्तीर्थं भविष्यति । पावनं भव्यलो-
कानां,-मीहितार्थसुरद्रुमं ॥ २३ ॥ रजताशोकवृक्षस्य, तलस्थे जिनसद्मनि । सुवर्णनिर्मिते वासु,-पूज्यस्य प्रतिमां
नवां ॥ २४ ॥ कारयित्वा रत्नमयीं, नानाभरणभूषितां । विधाय भद्रे सतत,-मधुना त्वं प्रपूजय ॥ २५ ॥ युग्मं ॥
तेन पुण्येन भो भद्रे, त्वं सुगंधा भविष्यसि । सुगंधभूपवद्भूरि,-पुण्यादिष्टं न किं भवेत् ॥ २६ ॥ तावद्भगवन्
कोऽयं, सुगंधाख्यो महीपतिः । गुरुर्बभाण भरते,-ऽत्रास्ति सिंहपुरं पुरं ॥ २७ ॥ सिंहसेनाभिधस्तत्र, भूपोऽभूद्भूरिविक्रमः ।
पत्न्यासीत्तस्य कनक,-प्रभा चारुप्रभान्विता ॥ २८ ॥ तयोर्बभूव तनयो, लोकानामप्रियोऽधिकं । दुर्गंधो दुर्भगो निंद्यो,
नाम्ना निर्नामकः स्मृतः ॥ २९ तेनान्यदा मुदावंदि, जिनः पद्मप्रभाभिधः । पृष्टश्च विनयात्पूर्व,-भवोऽथ प्रभुरप्यवक् ॥ ३० ॥
बभूव श्रीनागपुरात्, पुराद् द्वादशयोजने । नीलवद्गिरिरित्युच्चो, विशालवरगह्वरः ॥ ३१ ॥ तत्रैकः कुरुते साधु,-र्मासक्षपणमाद-
रात् । पूर्वकर्म क्षपयितुं, वरवैराग्यसागरः ॥ ३२ ॥ तदा तत्रागमद्व्याधः, पाणौ विधृतकार्मुकः । मृगादिजंतुजातानां,

हिंसायां विहितादरः ॥ ३३ ॥ मुनिप्रभावात्सव्याधः, स्वकृत्ये निष्फलोऽजनि । साधुर्जगाम ग्रामांत,—र्भिक्षायै पारणाहनि ॥ ३४ ॥ कृत्वा पारणकं साधु,—स्तत्रागत्य शुभाशयः । कायोत्सर्गं चकारोच्चैः, शत्रुमित्रसमानदृक् ॥ ३५ ॥ व्याधः क्रुधा ज्वलन् साधु,—सन्निधाविंधनोत्करे । चिक्षेप वह्निं पापात्मा, किं ह्यकृत्यं दुरात्मनां ॥ ३६ ॥ व्यथां तपोधनो साधुः, सहमानः सुदुस्सहां । शुभध्यानवशात्प्राप्य, केवलं मुक्तिमासदत् ॥ ३७ ॥ व्याधोऽपि तेन पापेन, गलत्कुष्ठी बभूव सः । तापार्दितः क्रमान्मृत्वा, सप्तमं नरकं ययौ ॥ ३८ ॥ ततो घूकस्ततश्चाद्ये, नरके नारकस्ततः । सर्पः पंचमनरके, नारकः केसरी ततः ॥ ३९ ॥ चतुर्थे नरके नैर,—यिकस्ततश्च चित्रकः । ओतुर्द्वितीये नरके नारको घूकपक्ष्यपि ॥ ४० ॥ ततश्चाद्ये हि नरके, नारको दुःखपीडितः । ततो दरिद्रगोपालः, सोऽभवत्कर्मयोगतः ॥ ४१ ॥ त्रिभिर्विशेषकं ॥ स गोपः काननेऽन्येद्यु,—र्दवदग्धो गतः पुरे । श्राद्धदत्तनमस्कारो, मृतिमाप समाधिमान् ॥ ४२ ॥ नमस्कारस्य माहात्म्या त्त्व,—मभूर्नृपनंदनः शेषदुष्कर्मदोषेण, दुर्गंधश्च नरोत्तम ॥ ४३ ॥ श्रुत्वेत्यर्हद्वचस्तस्य, जातिस्मृतिरजायत । ततः सोऽवग् जिनं मां त्वं, निस्तारय दयांबुधे ॥ ४४ ॥ अर्हन्नुवाच भो भद्र, कुरु त्वं रोहिणीतपः । सोऽपि प्रपद्यार्हद्वाक्यं, तच्चकार तपश्चिरं ॥ ४५ ॥ प्रभावात्तपसस्तस्य, दुर्गंधत्वमगाद्द्रुतं । सुगंधत्वमभूद्देहे, तपसा किं न सिध्यति ॥ ४६ ॥ सुगंध इति तस्यासी,—न्नामापि जगतीतले । लोकैः सर्वैः श्लाघितस्य, यशः पुण्यैरवाप्यते ॥ ४७ ॥ तथा तपःप्रभावेण, सुगंधा त्वं भविष्यसि । श्रुत्वेति सा गुरोर्वाक्यं, तथेति प्रत्यपद्यत ॥ ४८ ॥ तत्तपो विधिना चक्रे, शर्मदं सा मनस्विनी । क्रमात्सुगंधा सुभगा जनमान्या च साभवत् ॥ ४९ ॥ मृत्वा समाधिना सांते, देवीभूता ततश्च्युता । चंपेशमघवपुत्री, संजाता तनयोत्तमा ॥ ५० ॥ सुरूपा रोहिणी नाम्ना,

सदा शोकविवर्जिता । तव राज्ञी महीपाल, बभूवेयं महासती ॥५१॥ पुनर्बभाण भूपालो, भगवन् कथ्यतां मम । अस्या मयि महान् स्नेहो, ममाप्यस्यां कुतो हि सः ॥ ५२ ॥ मुनिर्जगाद राजेंद्र, तन्निदानं वदाम्यहं । सावधानं मनः कृत्वा, शृणु श्रावकपुंगव ॥ ५३ ॥ सिंहसेनोऽथ नृपतिः, सुगंधाख्यं स्वनंदनं । राज्येऽभिषिच्य सुगुरोः, पार्श्वे दीक्षां स्वयं ललौ ॥ ५४ ॥ सुगंधराजापि चिर,—माराध्य जिनशासनं । प्रांते समाधिना मृत्वा, देवभूयं समासदत् ॥ ५५ ॥ इतश्च जंबूद्वीपस्थ,—विदेहे सुखसद्मनि विजये पुष्कलावत्यां, नगरी पुंमरीकिणी ॥ ५६ ॥ तत्रासीन्मेदिनीपालः, प्रजापालनतत्परः । नाम्ना हि विमलकीर्ति, श्चारुकीर्तिर्महामतिः ॥ ५७ ॥ चारुभद्रा सुभद्रेति, नाम्ना तस्य सधर्मिणी । सुशीला मंजुवचना, लावण्यरसनिम्नगा ॥ ५८ ॥ स्वर्गात् सुगंधजीवो हि, च्युत्वा तत्कुक्षिकंदरे । चतुर्दशमहास्वप्न,—सूचितोऽवातरन्निशि ॥ ५९ ॥ शुभेऽह्नि तनयं देवी, मासूत शुभलक्षणं । सहस्ररश्मि प्राचीव, जयदत्तं शची यथा ॥ ६० ॥ अर्ककीर्तिरिति ख्यातं पित्रा नाम विनिर्ममे । सुतस्य प्रेमपात्रस्य, चारुगात्रस्य संमदात् ॥ ६१ ॥ धात्रीभिर्लाल्यमानोऽसौ, वृद्धिं प्राप दिने दिने । व्यधात्कलानां शौर्यादि—गुणानां च स संग्रहं ॥ ६२ ॥ क्रमाच्चक्रिपदं प्राप्य, भुक्त्वा राज्यं परं चिरं । जितशत्रुगुरोः पार्श्वे, प्रवव्राज सुधीनिधिः ॥ ६३ ॥ सुदुष्करं तपस्तप्त्वा, शुध्धां दीक्षां प्रपाल्य सः । कालं कृत्वाच्युतेंद्रोऽभूद्, द्वादशे त्रिदशालये ॥ ६४ ॥ ततश्च्युत्वा महीनाथ, त्वमशोकाभिधोऽभवः । करणादेकतपसः, स्नेहोऽस्ति युवयोर्मिथः ॥ ६५ ॥ स्वसुतानां सुंदरत्वे, कारणं शृणु भूपते । वदामि मथुरापुर्या—मग्निशर्मा द्विजोऽभवत् ॥ ६६ ॥ बभूवुर्नंदनास्तस्य, सप्त दारिद्र्यभाजनं । भिक्षायै लोकगेहेषु, भ्रमंति स्म निरंतरं ॥ ६७ ॥ अन्यदा पाटलीपुत्रे, पुरे भिक्षाकृते ययुः । ते सप्त नगरो-

द्याने, तस्थुर्विश्रामहेतवे ॥ ६८ ॥ तेऽपश्यन् भूपतेः पुत्रा,—न्नानाभरणभूषितान् । क्रीडतः क्रीडया कामं, सुरूपान् देवसन्निभान् ॥६९॥ दृष्ट्वा हि क्रीडनं तेषा,—मचिंति द्विजनंदनैः । अहो पुण्यफलं चित्त,—चमत्कारकरं महत् ॥७०॥ नूनमेभिस्तपस्तप्तं, परं प्राचीनजन्मनि । यस्माद्राजकुले जन्म, लब्धं रूपमनुत्तरं ॥७१॥ अकारि दुष्कृतं पूर्वे, भवेऽस्माभिर्यतोऽधुना । लेभे हीनकुले जन्म, दारिद्र्योपद्रवः पुनः ॥७२॥ इति चिंताजुषां तेषां, मुनिर्दृग्गोचरं गतः । शुभोदयेन सद्भक्त्या, स तैरागत्य वंदितः ॥७३॥ योग्यान् विज्ञाय विनया,—वनतांस्तान् दयापरः । धर्मोपदेशं प्रददौ, स वाचंयमपुंगवः ॥ ७४ ॥ धर्मः कल्पद्रुमः पुंसां, धर्मश्चिंतामणिः परः । धर्म एवापवर्गस्य, पारंपर्येण साधकः ॥ ७५ ॥ धर्मस्य जननी जीव,—दयैव गदिता जिनैः । सौभाग्यारोग्यदीर्घायुः,—श्लाघादाने पटीयसी ॥ ७६ ॥ इति साधुमुखात् श्रुत्वा, श्रद्धाभावितचेतसः । ते प्रपद्यार्हतं धर्म,—माराध्य च दिवं गताः ॥ ७७ ॥ ततश्च्युत्वा बभूवुस्ते, गुणपालादयस्तव । सप्तापि भूपते पुत्रा, रूपेण सुरसन्निभाः ॥ ७८ ॥ अथाष्टमसुतस्याहं, वच्मि पूर्वभवं नृप । वैताढ्यशैले भिल्लांक,—पुरमासीत्पदं श्रियः ॥ ७९ ॥ तत्र विद्याधरो नाम्ना, चारुकीर्तिरभूत्पुरा । अर्हदर्चावंदनादि,—कृत्यं चक्रे चिरं सुधीः ८० ॥ सोंऽते समाधिना मृत्वा, स्वर्गं सौधर्ममासदत् । ततश्च्युतोऽभवल्लोक, पालाख्यस्ते सुतोऽष्टम ः ॥८१॥ सान्निध्यं देवता तस्य, चकार पतनक्षणे । प्राक् शुभाचीर्णतः सोऽयं, सुतोऽजायत ते नृप ॥ ८२ ॥ पुत्रीणामथ भूपाल, प्राचीनसुकृतं शृणु । वैताढ्ये श्रीपुरे चित्र,—गतिर्विद्याधरोऽभवत् ॥ ८३ ॥ पुत्र्यश्चतस्रस्तस्यासन, रूपलावण्यराजिताः । जग्मुरन्येद्युरुद्यानं, क्रीडां ताः कर्तुमुद्यताः ॥८४॥ ज्ञानिनं च मुनिं तत्रा,—पश्यंस्ताः सुकृतोदयात् । साधुरप्यवदद्भद्रा, धर्मं वित्थ विधत्थ च ॥ ८५ ॥ ऊचुस्ता न वयं विद्मः, सुकृतं कुर्महे न च । मुमुक्षुरवदत्स्तोक,—मायुर्वो वर्तते खलु ॥ ८६ ॥ जगुस्ताः

कियदस्माक,—मायुरस्ति प्रभो वद । अवक् साधुर्वासरेऽस्मिन पंचत्वं वो भविष्यति ॥ ८७ ॥ ताभिः सर्वाभिरप्युक्तं, मुमुक्षो स्तोकवेलया । क्रियते धर्मकृत्यं किं, परलोकसुखावहं ॥ ८८ ॥ वाचंयमोऽप्युवाचैवं, वचनं शृणुतानघाः । विद्यतेऽद्य दिनं शुक्ल, पंचम्या अतिशोभनं ॥८९॥ ज्ञानस्याराधनं भक्तया, क्रियतेऽद्यतने दिने । उपवासस्य च प्रत्या--ख्यानं सुगुरुसन्निधौ ॥ ९० ॥ अतो यूयं हि कुरुतो,—पवासं श्रद्धयान्विताः। सुखिन्यस्तपसानेन, भविष्यथ भवांतरे ॥ ९१ ॥ साधूदितं वचः श्रुत्वा, तत्तपः प्रतिपद्य ताः । अभिवंद्य गुरुं जग्मुः, स्वगृहं गतकल्मषाः ॥ ९२॥ ऊचुर्व्यतिकरं सर्वं, तं पितुः पुरतो हि ताः। तेनापि श्लाघिताः सत्यो, धन्यंमन्या मुदं दधुः ॥ ९३ ॥ स्थितास्ताः शुभभावेन, प्रपूज्य परमेश्वरं । विद्युत्पातेन तास्त्व, मृत्वा जग्मुः सुरालयं ॥ ९४ ॥ ततश्च्युताः सुता आसन्, सुखिन्यस्तव भूपते । शुक्लैकपंचमीघस्रे,—तपःप्राज्यप्रभावतः ॥ ९५ ॥ आसां मोक्षसुखं भावि, भवेऽस्मिन्नृशिरोमणे । किमिष्टं देहिनां न स्या,—त्तपसः श्रीजिनोदितात् ॥ ९६ ॥ निशम्येति वचः साधोः, प्रपद्य रोहिणीतपः । गुरुं प्रणम्य स्वगृहं, राजा राज्ञी च जग्मतुः ॥ ९७ ॥ तपश्चिरं समाराध्य, भुक्त्वा सौख्यं च दंपती । राज्यमुत्सृज्य सुगुरोः, पार्श्वे जगृहतुर्व्रतं ॥ ९८ ॥ कृत्वात्युग्रं तपः कर्म,—क्षयात्केवलमुज्ज्वलं । प्राप्य तौ दंपती मुक्तिं, जग्मतुर्दुःखवार्जितां ॥ ९९ ॥ रोहिण्यशोकयोर्वृत्तं, निशम्येति गुरूदितं । सततं क्रियतां भव्याः, प्रयत्नो रोहिणीतपे ॥ १०० ॥ श्रीमत्तपगणगगनां,—गणदिनमणिविजयसेनसूरीणां । शिष्याणुना कथेयं , विनिर्मिता कनककुशलेन ॥१॥ श्रीशांतिचंद्रवाचक,—विद्यागुरुमादरात्प्रणम्य मया । हयभूतरसेन्दुमिते (१६५७), वर्षे दीपोत्सवे लिलिखे ॥२॥ युग्मं ॥

॥ इति श्रीरोहिणीतपोमाहात्म्यविषये रोहिण्यशोकचंद्रकथा संपूर्णा ॥